# श्रीसोमनाथ-संस्कृत-युनिवर्सिटी, वेरावलम्

# परिणामः

# (Outcomes)

## ॥विधावारिधि-कार्यक्रमः॥

## (Ph.D Program)

| प्रोग्राम कोड | प्रोग्राम | अपेक्षिताः परिणामाः (Outcomes) |
| --- | --- | --- |
| 01 | विद्यावारिधिः | • शोधविषयचयनप्रक्रियाज्ञानम्। <br> • शोधसंज्ञा, शोधप्रकृतयः, शोधपरिसरः, तथ्यसङ्ग्रहणम् इत्यादिविषयाणां ज्ञानम्। <br> • संस्कृतशोधपत्रिकाणां व्यवहारः। <br> • ताडपत्रादिमातृकासम्पादने शोधकर्तुः कर्तव्यम्। <br> • लिप्यन्तरीकरणे वर्णसङ्केतविधिज्ञानम्। <br> • समीक्षात्मकग्रन्थसम्पादनप्रविधिबोधः। <br> • प्लेगेरिज्मपरिचयः। (An Introduction to Plagiarism) <br> • मुद्रणसंशोधनप्रविधिबोधः। |

**॥तत्त्वाचार्य-कार्यक्रमः॥**

**(M.Phil Program)**

| **प्रोग्राम कोड** | **प्रोग्राम** | **अपेक्षिताः परिणामाः (Outcomes)** |
|---|---|---|
| 02 | तत्त्वाचार्यः | • तत्त्वाचार्य-कार्यक्रमे अधीत्य छात्रः स्वेन चितस्य शास्त्रस्य तलस्पर्शि ज्ञानं प्राप्स्यति<br>• छात्रः स्वशास्त्रसम्बद्धान् प्रश्नान् उत्थापयितुं शक्ष्यति<br>• शास्त्रसम्बद्धान् प्रश्नान् समाधातुम् योग्यस्य शोधप्रविधेः विषये ज्ञास्यति<br>• स्वशास्त्रसम्बद्धानां चिकित्सात्मकानां ग्रन्थानां ग्रन्थकाराणां च परिचयं प्राप्स्यति<br>• विविधटीकोपटीकानाम् अवलोकनं करिष्यति<br>• शास्त्राणां लोकोपकारकान् पक्षान् आश्रित्य लेखनस्य क्षमतां प्राप्स्यति<br>• विविधासु शोधसङ्गोष्ठीषु भागं गृहीत्वा शोधपत्रलेखनस्य शोधपत्रप्रस्तुतेः च अनुभवं प्राप्स्यति<br>• नैकेषां शोधप्रबन्धानाम् अध्ययनं कृत्वा शोधप्रबन्धलेखनस्य विधिं ज्ञास्यति<br>• पाठसम्पादनस्य विधिं ज्ञास्यति।<br>• मुद्रण-संशोधनप्रविधेः ज्ञानं प्राप्स्यति।<br>• शास्त्रे, संशोधनविधौ च प्रावीण्यं प्राप्य स्वसंशोधनैः शास्त्रपरम्परां पोषयिष्यति |

## ॥तत्त्वाचार्य-विशिष्टकार्यक्रमाः॥

## (M.Phil Specific Programs)

### विषयः - वेदः (शुक्लयजुर्वेदः)

| Sr. No | U. G. & P.G | Outcome |
|---|---|---|
| 1. | Tattvacharya Veda | • भारतीयशिक्षणपद्धतौ सांस्कृतिमहत्त्वप्रदर्शनाय छात्राणाम् आधुनिकवृत्ति-अधिगमनाय प्रतियोगितापरीक्षासु लाभाय एषः पाठ्यक्रमः निर्धारितो वर्तते।<br>• भारतीयशिक्षायाः आकाङ्क्षापूर्त्यै एषः पाठ्यक्रमः निर्धारितः अस्ति।<br>• अनेन वैदिकमन्त्राणाम् उच्चारणविधिपुरःसरं वैदिकध्वनिविज्ञानस्य ज्ञानमपि भवति।<br>• तत्त्वाचार्यपाठ्यक्रमे यौ द्वौ ग्रन्थौ निर्धारितौ वर्तते, तयोरध्ययनेन वैदिकसंस्कृतेः ज्ञानेन सह भाषाविकासज्ञानं तेन च भाषासाहित्यक्षेत्रे छात्राणां शोधप्रवृत्तिश्चोपजायते। |

### विषयः - फलितज्योतिषम्

| Sr. No | U. G. & P.G | Outcome |
|---|---|---|
| 2. | Tattvacharya Falita Jyotisha | तत्त्वाचार्यकक्षायां छात्राः आहत्य त्रीणिप्रश्नपत्राणि पठन्ति। तेषु एकं फलितज्योतिषस्य प्रश्नपत्रं भवति। एतेन समम् एव छात्रैः फलितज्योतिषविषये स्वीयः लघुशोधप्रबन्धः अपि विलिख्य प्रस्तोतव्यः भवति।<br>• फलितज्योतिषशास्त्रे तत्त्वाचार्यपाठ्यक्रमं पठित्वा छात्रः फलितज्योतिषशास्त्रे संशोधनस्य विविधान् आयामान् ज्ञास्यति।<br>• फलितज्योतिषशास्त्रे शोधप्रबन्धलेखनेन फलितज्योतिषशास्त्रे संशोधनस्य साक्षात् अनुभवं प्राप्स्यन्ति। |

**विषयः - नव्यव्याकरणम्**

| Sr. No | U. G. & P.G | Outcome |
|---|---|---|
| 3. | Tattvacharya Navyavyakarana | तत्त्वाचार्यकक्षायां छात्राः आहत्य त्रीणिप्रश्नपत्राणि पठन्ति। तेषु एकं व्याकरणस्य प्रश्नपत्रं भवति। एतेन समम् एव छात्रैः व्याकरणविषये स्वीयः लघुशोधप्रबन्धः अपि विलिख्य प्रस्तोतव्यः भवति।<br>• व्याकरणशास्त्रे तत्त्वाचार्यपाठ्यक्रमं पठित्वा छात्रः व्याकरणशास्त्रे संशोधनस्य विविधान् आयामान् ज्ञास्यति।<br>• व्याकरणशास्त्रे शोधप्रबन्धलेखनेन व्याकरणशास्त्रे संशोधनस्य साक्षात् अनुभवं प्राप्स्यन्ति। |

**विषयः - पुराणेतिहासः**

| Sr. No | U. G. & P.G | Outcome |
|---|---|---|
| 4. | Tattvacharya Puraanetihaasa | तत्त्वाचार्यकक्षायां छात्राः आहत्य त्रीणिप्रश्नपत्राणि पठन्ति। तेषु एकं पुराणेतिहासस्य प्रश्नपत्रं भवति। एतेन समम् एव छात्रैः पुराणेतिहासविषये स्वीयः लघुशोधप्रबन्धः अपि विलिख्य प्रस्तोतव्यः भवति।<br>• पुराणेतिहासे तत्त्वाचार्यपाठ्यक्रमं पठित्वा छात्रः पुराणेतिहासे संशोधनस्य विविधान् आयामान् ज्ञास्यति।<br>• पुराणेतिहासे शोधप्रबन्धलेखनेन पुराणेतिहासे संशोधनस्य साक्षात् अनुभवं प्राप्स्यन्ति। |

**विषयः - सर्वदर्शनम्**

| Sr. No | U. G. & P.G | Outcome |
|---|---|---|
| 5. | Tattvacharya Sarvadarsha | • भारतीयदर्शनेषु संशोधनपद्धतेः ज्ञानं भवति ।<br>• भारतीयदर्शनेषु निरूपितानां प्रमाणानां ज्ञानं भवति । |

| | | |
|---|---|---|
| | na | • भारतीयदर्शनस्य प्रमुखसिद्धान्तानां ग्रन्थानाम्, ग्रन्थकर्तॄणां च परिचयः भवति । |

**विषयः - साहित्यम्**

| Sr. No | U. G. & P.G | Outcome |
|---|---|---|
| 6. | Tattvacharya Sahitya | तत्त्वाचार्यकक्षायां छात्राः आहत्य त्रीणिप्रश्नपत्राणि पठन्ति। तेषु द्वे साहित्यस्य प्रश्नपत्रे भवतः। एतेन समम् एव छात्रैः साहित्यविषये स्वीयः लघुशोधप्रबन्धः अपि विलिख्य प्रस्तोतव्यः भवति।<br>• साहित्यशास्त्रे तत्त्वाचार्यपाठ्यक्रमं पठित्वा छात्रः साहित्ये संशोधनस्य विविधान् आयामान् ज्ञास्यति।<br>• साहित्यशास्त्रे शोधप्रबन्धलेखनेन साहित्यशास्त्रे संशोधनस्य साक्षात् अनुभवं प्राप्स्यन्ति। |

**॥तत्त्वाचार्य-पाठ्यक्रमाः॥**

**(M.Phil Courses)**

| **Paper-1 शोधप्रविधिः** | | | **Semester-1** |
|---|---|---|---|
| **Sr. No** | **Code** | **Name of Subject** | **Outcome** |
| 1. | | शोधप्रविधिः | ● अस्य प्रश्नपत्रस्य अध्ययनेन छात्रः अनुसन्धानस्य स्वरूपं परिभाषां च ज्ञास्यति। <br>● शोधसमस्यायाः निर्धारणे, मण्डने, शोधप्रकारस्य निर्धारणे च क्षमो भविष्यति। <br>● समीक्षितपाठसम्पादनस्य विधिं ज्ञास्यति |

| **Paper-2 वेदः** | | | **Semester-1** |
|---|---|---|---|
| **Sr. No** | **Code** | **Name of Subject** | **Outcome** |
| 1. | - | शुक्लयजुर्वेदप्रातिशाख्यम्, बृहद्देवता च | ● यतो हि प्रातिशाख्यानि वैदिकशिक्षायाः व्याकरण-स्वरादीनाञ्च प्रतिपादकग्रन्थाः भवन्ति,येन वैदिकमन्त्राणाम् उच्चारणविधिपुरःसरं वैदिकध्वनिविज्ञानमपि ज्ञातं भवति छात्रैः । अत एव शुक्लयजुर्वेदप्रातिशाख्यस्य पाठ्यक्रमे निर्धारणमस्ति । ऋग्वेदीयप्रातिशाख्यस्यान्यत्र निर्धारितत्वादत्र सामान्यछात्राणां कृतेऽस्य प्रातिशाख्यस्य भारतीयधर्मचिन्तनप्रसङ्गे च वैदिकदेवशास्त्रस्यावबोधाय बृहद्देवतायाः अपि निर्धारणमस्ति पाठ्यग्रन्थे। एतदेवोपर्युक्तं फलम्। |

| Paper-2 ज्योतिषम् | | | Semester-1 |
|---|---|---|---|
| Sr. No | Code | Name of Subject | Outcome |
| 2. | | | • अस्य प्रश्नपत्रस्य अध्ययनेन छात्रः सूत्रात्मकरूपेण राशीनां ग्रहाणां च परिचयं प्राप्स्यति।<br>• विविधानां योगानां ज्ञानं सूक्ष्मतया सूत्रात्मकरूपेण ज्ञातुं शक्नोति।<br>• अरिष्टादीन् सूक्ष्मतया सूत्रात्मकरूपेण ज्ञातुं शक्नोति।<br>• होराशास्त्रस् मुख्यतत्त्वानां सविस्तरं ज्ञानं प्राप्तुं शक्नोति। |

| Paper-2 व्याकरणम् | | | Semester-1 |
|---|---|---|---|
| Sr. No | Code | Name of Subject | Outcome |
| 3. | | उणादिप्रकरणम्,<br>पाणिनीयशिक्षा,<br>लिङ्गानुशासनम् | • अस्य विषयस्य पठनेन छात्रा व्याकरणशास्त्रे वर्तमानानाम् उत्कृष्टानां शोधप्रबन्धानां शैलीज्ञानं प्राप्स्यन्ति।<br>• अस्मिन् विषये उणादिसूत्राणां पठनेन नैकेषां शब्दानां व्युत्पत्तिप्रक्रियां ज्ञास्यन्ति।<br>• अस्मिन् विषये निर्धारितस्य 'पाणिनीयशिक्षा' इत्यस्य ग्रन्थस्य अध्ययनेन छात्राः वर्णोच्चारणस्य सूक्ष्मताः ज्ञास्यन्ति।<br>• अस्मिन् विषये निर्धारितस्य 'लिङ्गानुशासनम्' इत्यस्य भागस्य अध्ययनेन छात्राः शब्दानां लिङ्गानां सम्यक् ज्ञानं प्राप्स्यन्ति। |

| **Paper-2 पुराणेतिहासः** | | | **Semester-1** |
|---|---|---|---|
| **Sr. No** | **Code** | **Name of Subject** | **Outcome** |
| 4. | | लिङ्गपुराणम् | • अस्य प्रश्नपत्रस्य अध्ययनेन छात्रः शिवतत्त्वविषयकं ज्ञानं प्राप्स्यति<br>• एषः विश्वविद्यालयः प्रभासतीर्थे संस्थापितः वर्तते। अस्य प्रश्नपत्रस्य अध्ययनेन छात्रः प्रभासतीर्थस्य महत्त्वं ज्ञास्यति।<br>• भगवतः शिवस्य सगुणनिर्गुणस्वरूपयोः ज्ञानं प्राप्स्यति। |

| **Paper-2सर्वदर्शनम्** | | | **Semester-1** |
|---|---|---|---|
| **Sr. No** | **Code** | **Name of Subject** | **Outcome** |
| 5. | | भारतीयदर्शनम् | • भारतीयदर्शनेषु संशोधनपद्धतेः ज्ञानं भवति।<br>• भारतीयदर्शनेषु निरूपितानां प्रमाणानां ज्ञानं भवति।<br>• भारतीयदर्शनस्य प्रमुखसिद्धान्तानां ग्रन्थानाम्, ग्रन्थकर्तॄणां च परिचयः भवति। |

| Paper-2 साहित्यम् | | | Semester-1 |
|---|---|---|---|
| **Sr. No** | **Code** | **Name of Subject** | **Outcome** |
| 6. | | काव्यानुशासनम् | • हेमचन्द्राचार्यस्य तत्कृतीनां च परिचयः । <br> • काव्यलक्षण-स्वरूपज्ञानम् । <br> • काव्यगुणरीतिदोषज्ञानम् । <br> • रसाणां स्वरूपभेदज्ञानम् । <br> • दृश्य-श्राव्यादि-काव्यप्रकारज्ञानम् । |

| Paper- 1 | | | Semester-2 |
|---|---|---|---|
| **Sr. No** | **Code** | **Name of Subject** | **Outcome** |
| 1. | | प्रसन्नराघवम् | • जयदेवस्य तत्कृतीनां च परिचयज्ञानम् । <br> • प्रसन्नराघवस्य वैशिष्ट्यज्ञानम् । <br> • प्रसन्नराघवस्य शैलीज्ञानम् । <br> • प्रसन्नराघवस्य पात्रवैशिष्ट्यज्ञानम् । <br> • नाटकस्य रसास्वादः लक्षणसङ्गतिसामर्थ्यं च । <br> • श्लोकव्याख्यानसामर्थ्यम् । |

## ॥आचार्य-कार्यक्रमः॥

| प्रोग्राम कोड | प्रोग्राम | अपेक्षिताः परिणामाः (Outcomes) |
|---|---|---|
| 03 | आचार्यः(M.A.) | • संस्कृतेन मौखिक्यां लिखितायां च अभिव्यक्तौ पटुत्वं प्राप्स्यति।<br>• आचार्य-कार्यक्रमे अधीत्य छात्रः भारतीयजीवनशैल्याः विशिष्टं परिचयं प्राप्स्यति।<br>• संस्कृतेन लिखितानां शास्त्राणाम् आशयं समुचिततया ज्ञातुं क्षमो भविष्यति।<br>• शास्त्रार्थकरणे अपेक्षितः विवेकः छात्रे जागरिष्यति।<br>• भारतीयचिन्तनपरम्पराम् आत्मसात् करिष्यति।<br>• छात्रस्य मनसि भारतीयज्ञानपरम्परायाः विषये गौरवं जागरिष्यति।<br>• शास्त्रोक्तान् उपदेशान् जीवने व्यवहर्तुं क्षमो भविष्यति।<br>• शास्त्राध्ययनेन तर्कबुद्धेः, विश्लेषणात्मकचिन्तनस्य, संवादकौशलस्य च सम्पूर्णः विकासो भविष्यति।<br>• भारतीयसंस्कृतेः मूलभूतेषु शास्त्रेषु कस्यचित् एकस्य गूढार्थावगमने, संरक्षणे, अग्रिमान्वये सम्प्रेषणे, शास्त्रपरम्परायाः कालोचितसंवर्धने च समर्थो भविष्यति।<br>• स्वेन अध्ययनाय स्वीकृतात् शास्त्रात् भिन्नस्य कस्यचित् एकस्य शास्त्रस्य परिचयात्मकं ज्ञानं प्राप्स्यति।<br>• अनिवार्य-प्रश्नपत्रस्य पठनेन छात्राः व्यापकस्य संस्कृतसाहित्यस्य शास्त्राणां च सामान्यं ज्ञानं प्राप्स्यन्ति।<br>• विविध-शास्त्रटीकानाम् अध्ययनेन छात्रे अनुसन्धानवृत्तिः उद्बुद्धा भविष्यति।<br>• अस्मिन् कार्यक्रमे अधीत्य छात्रः NET, SET, SLET इत्यादिपरीक्षाः उत्तरीतुं सज्जः भविष्यत।<br>• शास्त्राध्ययनेन विवेकबुद्धेः उत्तरदायित्वबोधस्य च विकासेन व्यक्तिगतजीवने, उद्योगक्षेत्रे, समाजे च महत्त्वपूर्ण-उत्तरदायित्वानि निर्वोढुं सज्जो भविष्यति। |

**(M.A. Program)**

**॥आचार्य-विशिष्टकार्यक्रमाः॥**

**(M.A. Specific Programs)**

विषयः - वेदः (शुक्लयजुर्वेदः)

| Sr. No | U. G. & P.G | Outcome |
|---|---|---|
| 1. | Acharya | • भारतीयशिक्षणपद्धतौ सांस्कृतिमहत्त्वप्रदर्शनाय छात्राणाम् आधुनिकवृत्ति-अधिगमनाय प्रतियोगितापरिक्षासु लाभाय एषः पाठ्यक्रमः निर्धारितो वर्तते।<br>• भाष्यग्रन्थानाम् अध्ययनेन छात्राणां मन्त्रार्थज्ञानं भवति।<br>• सम्पूर्णस्य वैदिकवाङ्मयस्य प्रतिपाद्यो विषयोऽस्ति धर्मः। स च धर्मः यागादिरूपः अत एव यागकर्मणां भारतीयसांस्कृतिकं महत्त्वं वैज्ञानिकं च चिन्तनं ज्ञातं भवति।<br>• विश्वधर्मं प्रति छात्रेषु समानभावसंस्कारः समुदेति।<br>• श्रौतयागसम्पादनसन्दर्भे शास्त्रीयप्रक्रियानुसारं यज्ञीयपात्राणां शास्त्रे विवेचनमस्ति, तन्माध्यमेन वैदिकवास्तु-शिल्पकलादीनां छात्रेषु ज्ञानं जायते।<br>• प्राचीनयज्ञपरम्परायाः संरक्षणेन साकं रसायनशास्त्रीयमपि ज्ञानं भवति।<br>• छात्रेषु वैदिककर्मसंस्कृतेः ज्ञानस्योद्भावनेन साकं तर्कशक्तिसमुत्पादनमपि भवति। |

विषयः - ज्योतिषशास्त्रम्

| Sr. No | U. G. & P.G | Outcome |
|---|---|---|
| 2. | Acharya | • अनेन पाठ्यक्रमेण छात्रेषु होरास्कन्धस्य तथ्यैः सह संहितास्कन्धस्य सर्वेषां विषयाणां ज्ञानवशात् ज्योतिषशास्त्रीयतथ्येषु अनुसन्धानात्मक-भावनायाः विकासः, तर्कशक्तेश्च विकासः भविष्यति ।<br>• छात्राः अध्यापनकार्यं, लोके ज्योतिषशास्त्रीयपरामर्शकार्यञ्च सम्यक्तया कृत्वा ज्योतिषशास्त्रस्य परम्परायाः विकासं करिष्यन्ति । |

विषयः - नव्यव्याकरणम्

| Sr. No | U. G. & P.G | Outcome |
|---|---|---|
| 3. | Acharya | आचार्यकक्षायां मुख्यरूपेण नव पुस्तकानि निर्धारितानि सन्ति-<br>• प्रौढमनोरमा (आरम्भतः षड्लिङ्गं यावत्) 2. लघुशब्देन्दुशेखरः (आरम्भतः षड्लिङ्गं यावत्) 3. वैयाकरणसिद्धान्तकौमुदी (निर्धारितः अंशः) 4. परमलघुमञ्जूषा 5. वाक्यपदीयम् 6. वैयाकरणभूषणसारः (निर्धारितः अंशः) 7. महाभाष्यम् (सप्तमतः नवमम् आह्निकं यावत्) 8. व्युत्पत्तिवादः (निर्धारितः अंशः) 9. लघुसिद्धान्तकौमुदी (निर्धारितः अंशः)।<br>• आचार्यकक्षायां व्याकरणविषयः ऐच्छिकविषयरूपेण अपि चतुर्षु सत्रेषु पाठ्यते। यत्र कस्यापि विषयस्य छात्राः नामाङ्कनं ग्रहितुं शक्नुवन्ति। अतः तेषां समेषां छात्राणां कृते प्रतियोगिपरीक्षायां निर्धारितपाठ्यक्रमत्वेन लाभकरः लघुसिद्धान्तकौमुद्याः निर्धारितः अंशः अभ्यासक्रमे समाविष्टो विद्यते।<br>• द्विवर्षीयायां आचार्यकक्षायां अन्यसंस्कृतविश्वविद्यालयस्य अभ्यासक्रमानुरोधेन तथा च नेट (NET) अभ्यासक्रमानुरोधेन लघुसिद्धान्तकौमुदीम् अतिरिच्य अन्ये ग्रन्थाः ग्रन्थांशाश्च पाठ्यक्रमे निर्धारिताः सन्ति।<br>• व्याकरणस्य अध्ययनेन छात्राः शुद्धेन संस्कृतेन वक्तुं लेखितुं च शक्नुवन्ति।<br>• महाकाव्येषु, नाटकेषु च प्रयुक्तान् शब्दान् यथावत् ज्ञातुं व्याख्यातुं च शक्नुवन्ति।<br>• ये छात्राः अग्रे संस्कृतशिक्षकाः भवन्ति ते व्याकरणद्वारा भाषां सम्यक् ज्ञात्वा उत्कृष्टाः शिक्षकाः भवितुम् अर्हन्ति।<br>• पीएच्. डी. इत्यादि-प्रगताध्ययनं चिकीर्षूणां कृते अपि व्याकरणाध्ययनम् अतीव उपकरोति। |

विषयः - पुराणेतिहासः

| Sr. No | U. G. & P.G | Outcome |
|---|---|---|
| 4. | Acharya | • संस्कृतभाषायाः परम्परागतशिक्षणे पुराणस्य श्लोकानां शुद्धोच्चारणपूर्वकं पारायणकौशल्यम्।<br>• आदर्शमानवनिर्माणं पुराणोक्तचरित्रैः सम्भाव्यते।<br>• अनुस्नातकोत्तराभ्यासाय व्यवसायप्राप्त्यै विषयोऽयं साधकः।<br>• व्यासपरम्परया प्राचीनार्वाचीनसामाजिकव्यवस्थायाः बोधः।<br>• सङ्गीतविद्यायां कथा-प्रवचनक्षेत्रेण अर्थोपार्जनम्।<br>• मानवमूल्यानामभ्यासः विविधैः चरित्रैः कथाभिश्च सम्भाव्यते। |

विषयः - सर्वदर्शनम्

| Sr. No | U. G. & P.G | Outcome |
|---|---|---|
| 5. | Acharya | • सर्वेषु दर्शनेषु प्रतिपादितेषु सिद्धान्तेषु व्युत्पत्तिमतां योग्यतावतां च छात्राणां निर्माणं भवति।<br>• सर्वेषां सिद्धान्तानाम् अध्ययनद्वारा सिद्धान्तेषु विशदचर्चां कर्तुं प्रावीण्यसम्पादनपूर्वकं तत्तद्दर्शनेषु नूतनग्रन्थानाम् आविष्करणाय योग्यतावतां छात्राणां निर्माणं भवति।<br>• अद्यत्वे दर्शनशास्त्रस्य अध्ययनं न्यूनं जायमानम् अस्ति, अतः तथाविधपरिस्थितौ दर्शनशास्त्रस्य अध्ययनाध्यापनपरम्परायाः संरक्षणं विधीयते।<br>• विभिन्नदर्शनशास्त्रेषु प्रतिपादितानां वैज्ञानिकतत्त्वानाम् आधुनिकदृष्ट्या परिशीलनाय अन्वेषणाय च योग्यतावतां विद्यार्थिनां निर्माणं भवति। |

विषयः - साहित्यम्

| Sr. No | U. G. & P.G | Outcome |
|---|---|---|
| 6. | Acharya | • साहित्यशास्त्रस्य, काव्यशास्त्रस्य काव्यशास्त्रेतिहासस्य च परिचयो भविष्यति ।<br>• कारयित्री-भावयित्रीप्रतिभयोः विकासः सम्पत्स्यते ।<br>• विद्यालय-महाविद्यालय-विश्वविद्यालयादिषु कार्यक्षेत्रेषु सेवावृत्तेः अवसरः प्राप्स्यते ।<br>• अभिनयादि-नाट्यतत्त्वानां परिचयो भविष्यति ।<br>• नैतिक-धार्मिक-सांस्कृतिक-यौगिकमूल्यानां बोधः तत्र प्रवृत्तिश्च भविष्यतः । |

विषयः - वास्तुशास्त्रम्

| Sr. No | U. G. & P.G | Outcome |
|---|---|---|
| 7. | Acharya | • अस्य पाठ्यक्रमस्य अध्ययनेन छात्रः प्राचीनकालस्य नृपसचिवपुरोहितादिगृहप्रमाणज्ञानं प्राप्स्यति।<br>• गृहसमीपे शुभाशुभवृक्षज्ञानं, गृहेषु प्रयुक्तकाष्ठज्ञानम्, इष्टकादिलक्षणज्ञानं च प्राप्स्यति।<br>• भूमिपरीक्षणज्ञानं, शल्योद्धारज्ञानं, भूमिवशात् जलज्ञानं, वृक्षज्ञानवशात् जलज्ञनं च प्राप्स्यति।<br>• गृहेषु विविधानां प्रकोष्ठानां स्थापनज्ञानं प्राप्स्यति।<br>• देवालयनिर्माणज्ञानं, प्रतिमालक्षणज्ञानं च प्राप्स्यति।<br>• गृहसम्बन्धिनां विविधानां मुहूर्तानां ज्ञानं प्राप्स्यति।<br>• इत्थं छात्रः अस्य पाठ्यक्रमस्य अध्ययनेन वास्तुसम्बन्धिनां समेषामपि विषयाणां ज्ञानं प्राप्य उत्कृष्टः वास्तुपरामर्शकः भवितुम् अर्हति। |

विषयः - पौरोहित्यम्

| Sr. No | U. G. & P.G | Outcome |
|---|---|---|
| 8. | Acharya | • जनसामान्यश्रद्धोत्पादकविविधयज्ञविधीनां वैज्ञानिकाभिगमेन शास्त्रोक्तपरिपाटीवताम् आचारवतां च श्रेष्ठाचार्याणां निर्माणम्। <br> • नित्य-नैमित्तिक-प्रायश्चित्तोपासनाकर्मविवेकवतां जिज्ञासुशोधार्थिनां वैदिकविधिषु रुच्युत्पादकाभिगमः। <br> • विधि-नियमानुष्ठानपद्धतिबोधवताम् आदर्शशोधच्छात्राणां कृते प्रायोगिकावसरप्रदानानुकूलवातावरणनिर्माणम्। <br> • समाजे प्रायश्चित्तीय-(Atonement)भावनोन्मुखीकरणद्वारा हिंसादिकृत्यनिवारणद्वारा च व्यक्ति-समाजचित्तशुद्धीकरणम्। |

विषयः - धर्मशास्त्रम्

| Sr. No | U. G. & P.G | Outcome |
|---|---|---|
| 9. | Acharya | • वेदमूलक-धर्मशास्त्रीयप्रकरणटीकादिग्रन्थानाम् परिशीलनेन तत्तद्धर्मतत्त्वानां बोधाचरणपुरस्सरं तत्तत्सिद्धान्तेषु नैपुण्यं संपाद्यते। <br> • आशौचादिद्वारा शारीरिकरोगसंभावनोत्सर्जनाभिगमनैपुण्यं संपाद्यते। <br> • विविधधर्मशास्त्रीयग्रन्थेषु प्रतिपादितवैदिकवैज्ञानिकतत्त्वानाम् आधुनिकदृष्ट्या परिशीलनाय अन्वेषणाय च योग्यतासादनम्। <br> • मानवमूल्यविकाससंबद्धनीतिपूर्वकं दया-दाक्षिण्य-विनयविवेकादिगुणविकासाय प्रयतनोत्साहसंपादनम्। |

विषयः - स्वामिनारायनवेदनातः (s)

| Sr. No | U. G. & P.G | Outcome |
|---|---|---|
| 10. | Acharya | • स्वामिनारायणसम्प्रदायस्याऽभ्यन्तरविषयिकी स्पष्टता भवति।<br>• ब्रह्मसूत्रस्याऽध्ययनेनौपनिषदिकसिद्धान्तः सुदृढो भवति।<br>• स्वामिनारायणसिद्धान्तसुधायाम् अक्षरपुरुषोत्तमदर्शननिरूपकवादग्रन्थे जीवेश्वरमायाब्रह्मपरब्रह्मेतितत्त्वपञ्चकादिविषयाणां विस्तृतमध्ययनं भवति।<br>• बृहदारण्यकछान्दोग्याद्युपनिषदां ज्ञानं भवति। |

विषयः - स्वामिनारायनवेदनातः (J)

| Sr. No | U. G. & P.G | Outcome |
|---|---|---|
| 11. | Acharya | • प्रस्थानत्रय्यनुगुणप्रमाणस्य परमप्रामाण्यात् मूलसम्प्रदायप्रमाणितभाष्याणाम् अध्यनेन स्वामिनारायणीयसम्प्रदायमूलसिद्धान्तावबोधः सुलभः स्यात्, मूलसम्प्रदायेतरसिद्धान्तानाञ्च दोषक्षतीनाम् अवबोधश्च भवेत् ।<br>• मुक्तमुनिप्रणीतस्य ब्रह्मसूत्रभाष्यरत्नस्य अध्ययनेन श्रुतिषु ब्रह्मविद्यासु च आभासमानान् विरोधान् छात्राः मिथो समन्वयेन सुचारुतया परिहारं कर्तुं क्षमाः भवेयुः ।<br>• गोपालानन्दमुनिविरचितानाम् उपनिषद्भाष्याणाम् अध्ययनेन छात्राणां कृते श्रीस्वामिनारायणसम्प्रदायस्य उपासनातत्त्वं तथा च वेदैः प्रकीर्तितस्य परब्रह्मणः भगवतः श्रीस्वामिनारायणस्य याथातथ्येन स्वरूपविज्ञानं स्यात् ।<br>• गोपालानन्दमुनिना विरचितगीताभाष्यस्य पठन-पाठन-श्रवणादिना छात्राणां कर्ममयोगज्ञानयोगयुक्तस्य भक्तियोगस्य साङ्ख्ययोगस्य च विज्ञानं प्रभवेत् । |

| | | |
|---|---|---|
| | | |

विषयः - रामानुजवेदान्तः

| Sr. No | U. G. & P.G | Outcome |
|---|---|---|
| 12. | Acharya | • वेदान्तज्ञानात् व्युत्पत्तेः निर्माणस्य कौशलप्राप्तिः । <br> • तर्कप्रस्थानस्य विशिष्टव्याख्यानकौशल्यस्य प्राप्तिः । <br> • विशिष्टाद्वैतस्य अध्ययनेन वेदान्तस्य अन्यासां शाखानाम् अध्ययनं सहजतया भवति । <br> • भारतीयदर्शनधारायां अप्रतिमश्रद्धाजननम् । |

विषयः - नव्यन्यायः

| Sr. No | U. G. & P.G | Outcome |
|---|---|---|
| 13. | Acharya | • विविधवादग्रन्थानाम्अध्ययनेननव्यन्यायशास्त्रस्यसिद्धान्तांज्ञानंस्पष्टयतयाप्राप्यते। <br> • व्युत्पत्तिवादग्रन्थस्याध्ययनेविभक्त्यर्थज्ञानंसुचारुतयाभवति। <br> • प्राचीनन्यायवैशिषकदर्शनयोःपरिचयंप्राप्यपदार्थानांस्वरूपंसूक्ष्मरीत्याभवति। <br> • शक्तिवादस्याध्ययनेनयुष्मदस्मदादिसर्वनामादिशब्दानाम्अर्थज्ञानंप्राप्यते। |

विषयः – M.A. ( योगः)

| Sr. No | U. G. & P.G | Outcome |
|---|---|---|
| 14. | M.A. | Curiosity regarding Yoga is rising throughout the world. This course therefore deals with various aspects of Yoga. This course enables students to know about –<br>• history and tradition of Yoga<br>• traditional and Modern perspectives on Yoga<br>• details of Ashtanga Yoga<br>• various physical, mental, social and spiritual benefits of Yoga. |

## ॥आचार्य-पाठ्यक्रमाः॥
## (M.A Courses)

| **Paper-1 Compulsory Sanskrit** | | | **Semester-1** |
|---|---|---|---|
| **Sr. No** | **Code** | **Name of Subject** | **Outcome** |
| 1. | CF-4.1.1 | वैदिकसाहित्येतिहासः | • वेदानां परिचयः महत्त्वं च।<br>• ब्राह्मणग्रन्थानां परिभाषा, प्रयोजनं परिचयश्च।<br>• आरण्यकसाहित्यज्ञानम्।<br>• प्रमुखोपनिषदां परिचयः।<br>• वेदाङ्गानां सङ्क्षिप्तः परिचयः। |

| **Paper-2, 3, 4 & 5Veda** | | | **Semester-1** |
|---|---|---|---|
| **Sr. No** | **Code** | **Name of Subject** | **Outcome** |
| 1. | CC- 4.1.1 | शुक्लयजुर्वेदमाध्यन्दिन-संहिता (चयनयागः) | • छात्राणां धर्मार्थकाममोक्षाणां चतुर्विधफलज्ञानाय अस्य भाष्यस्य ज्ञानमावश्यकम्। एतद् ज्ञानं महीधरभाष्यादिभिरेव भवतीति धिया महीधरभाष्यसहिता संहितायाः निर्धारिताध्यायाः पाठ्यन्ते छात्रेभ्यः। |
| 2. | CC- 4.1.2 | निरुक्तम् (दैवतकाण्डम्) | • कर्मकाण्डनिमित्तं मन्त्रार्थज्ञानम् अपेक्षितं वर्तते। मन्त्रार्थज्ञानाय निरुक्तस्योपादेयताऽस्ति। दैवतकाण्डाध्यापनेन भारतीयसंस्कृतौ धार्मिकविषये बहुदेवतावादस्य स्वरूपं स्पष्टं भवति येन विश्वधर्मं प्रति छात्रेषु समानभावसंस्कारः समुदेतीति धिया पाठ्यग्रन्थः निर्धारितः। |

| | | | |
|---|---|---|---|
| 3. | CC- 4.1.3 | कात्यायनश्रौतसूत्रम् (प्रथमोऽध्यायः) | • कर्मकाण्डे द्रव्याणां प्रयोगो भवति। तत्र द्रव्याणां गुण-परिमाण-मात्रादिज्ञानम् अनेन ग्रन्थेन भवति। यज्ञकर्मणि ये प्राथमिकनियमाः वर्तन्ते तेषामपि ज्ञानं तद्ग्रन्थेन भवति। इदं शास्त्रं प्रायोगिकशास्त्रमस्तितस्मात् वैदिकयज्ञानां प्रायोगिकज्ञाने अस्य ग्रन्थस्य अध्ययनेन छात्रेषु अभिरुचिः जायते। |
| 4. | CE- 4.1.1 | वैदिकसूक्तसंग्रहः (ऋग्वेद-यजुर्वेदौ सम्बद्धौ) | • अनेन पाठ्यक्रमेण वैदिकदेवतानां विषये ज्ञानं भवति। ऋग्वेदीयेषु सूक्तेषु तत्तद्देवतानां वर्णनावसरे तासामेकैकस्या अपि सर्वोत्कृष्टत्वं सर्वतन्त्रस्वतन्त्रं च ज्ञानं भवति। पर्यावरणसुरक्षादृष्ट्या अस्य महत्त्वं वर्तते। प्रकृतितत्त्वं एव देवतत्त्वम् इत्यस्य सामञ्जस्यविधाने वैज्ञानिकी दृष्टिः छात्रेषु प्रादुर्भवति, तस्मात् प्रकृत्याः सुरक्षा एव अस्माकं सुरक्षा इति ज्ञानम् अनेन पाठ्यक्रमेण भवतीति फलम्। |

| **Paper-2, 3, 4 & 5 Falit Jyotish** | | | **Semester-1** |
|---|---|---|---|
| **Sr. No** | **Code** | **Name of Subject** | **Outcome** |
| 1. | CC- 4.1.1 | बृहत्संहिता (उपनयनाध्यायतः आषाढीयोगाध्यायं यावत्) | • अनेन पाठ्यक्रमेण छात्रैः दैवज्ञलक्षणं, सूर्यादिग्रहाणां बिम्बलक्षणवशात् शुभाशुभज्ञानं वराहमिहिरमतेन संवत्सराणां फलज्ञानं च करिष्यते।<br>• अनेन सूर्यादिग्रहाणां वर्षफलज्ञानं, वर्षागर्भसम्बन्धिलक्षणज्ञानं नक्षत्रगतपदार्थज्ञानञ्च कर्तुं शक्यते। |
| 2. | CC- 4.1.2 | रमलनवरत्नम्, नाह्निदत्तपञ्चविंशतिका | • अनेन पाठ्यक्रमेण छात्रैः सङ्क्षेपेण रमलशास्त्रस्य परिचयः पाशकानां च निर्माणविधिः ज्ञास्यते। शकलानां निर्माणं पाशकवशेन कर्तुं शक्यते।<br>• एतेन प्रश्नवशात् सर्वेषां विषयाणां रमलशास्त्रेण शुभाशुभस्य फलादेशः कर्तुं शक्यते।<br>• नाह्निदत्तपञ्चविंशतिकाग्रन्थमाध्यमेन सङ्क्षेपेण विवाहादिमुहूर्तज्ञानं करिष्यते। |
| 3. | CC- 4.1.3 | जातकपारिजातः (प्रारम्भतः मण्डपादिफलाध्यायं यावत्) | • अनेन पाठ्यक्रमेण छात्रैः वैद्यनाथमते ग्रहराशीनां विस्तृतरूपेण परिचयः प्राप्स्यते।<br>• एवञ्च अनेन छात्राः विविधानां योगानां ज्ञानेन सह अनफादियोगानां भेदप्रभेदादिज्ञानं करिष्यते। |
| 4. | CE- 4.1.1 | भारतीयकुण्डलीविज्ञानम् | • अनेन पाठ्यक्रमेण छात्रैः पञ्चाङ्गपरिचयः, राशिज्ञानं, तिथि-मास-पक्ष-ऋतूनां परिचयः, |

| | | | |
|---|---|---|---|
| | | | गोलायनसंवत्सराणां ज्ञानं, लग्नसारणीज्ञानं, चरसारणीज्ञानं, मासेश-वर्षेशसाधनम्, अक्षांशादीनां परिचयः तथा च एतैः सह जन्मकुण्डलीनिर्माणविधिः ज्ञास्यते। |

| **Paper-2, 3, 4 & 5 Navya Vyakaran** | | | **Semester-1** |
|---|---|---|---|
| **Sr. No** | **Code** | **Name of Subject** | **Outcome** |
| 1. | CC- 4.1.1 | महाभाष्ये षष्ठ-सप्तमाह्निके | • षष्ठाह्निके आदितः **विभाषा जसि** सूत्रपर्यन्तं महाभाष्यस्थितं सम्पूर्णं ज्ञानम्।<br>• षष्ठाह्निके **पूर्वापरा...**सूत्रतः समाप्तिपर्यन्तं महाभाष्यस्थितं सम्पूर्णं ज्ञानम्।<br>• सप्तमाह्निके आदितः **एच इग्घ्रस्वादेशे** सूत्रपर्यन्तं महाभाष्यस्थितं सम्पूर्णं ज्ञानम्।<br>• सप्तमाह्निके **षष्ठी स्थाने योगा...**सूत्रतः समाप्तिपर्यन्तं महाभाष्यस्थितं सम्पूर्णं ज्ञानम्। |
| 2. | CC- 4.1.2 | प्रौढमनोरमा (पञ्चसन्ध्यन्ताः) | • प्रौढमनोरमानुसारं संज्ञाप्रकरणस्थानां सूत्राणां, वार्त्तिकानां, पङ्क्तीनाम् (फक्किकानाम्) उदाहरणानाञ्च व्याख्या-ज्ञानम्।<br>• प्रौढमनोरमानुसारं परिभाषा-अच्सन्धिप्रकरणयोः पठितानां सूत्राणां, वार्त्तिकानां, पङ्क्तीनाम् (फक्किकानाम्) उदाहरणानाञ्च व्याख्या-ज्ञानम्।<br>• प्रौढमनोरमानुसारं हल्सन्धि-प्रकरणे पठितानां सूत्राणां, वार्त्तिकानां, पङ्क्तीनाम् (फक्किकानाम्) उदाहरणानाञ्च व्याख्या-ज्ञानम्।<br>• प्रौढमनोरमानुसारं विसर्गसन्धि-स्वादिसन्धिप्रकरणयोः पठितानां सूत्राणां, वार्त्तिकानां, पङ्क्तीनाम् (फक्किकानाम्) उदाहरणानाञ्च व्याख्या-ज्ञानम्। |
| 3. | CC- 4.1.3 | लघुशब्देन्दुशेखरः (पञ्चसन्ध्यन्ताः) | • लघुशब्देन्दुशेखरानुसारं संज्ञाप्रकरणस्थानां सूत्राणां, वार्त्तिकानां, पङ्क्तीनाम् (फक्किकानाम्) उदाहरणानाञ्च व्याख्या-ज्ञानम्। |

| | | | |
|---|---|---|---|
| | | | • लघुशब्देन्दुशेखरानुसारं परिभाषा-अच्सन्धिप्रकरणयोः पठितानां सूत्राणां, वार्त्तिकानां, पङ्क्तीनाम् (फक्किकानाम्) उदाहरणानाञ्च व्याख्या-ज्ञानम्।<br>• लघुशब्देन्दुशेखरानुसारं हल्सन्धि-प्रकरणे पठितानां सूत्राणां, वार्त्तिकानां, पङ्क्तीनाम् (फक्किकानाम्) उदाहरणानाञ्च व्याख्या-ज्ञानम्।<br>• लघुशब्देन्दुशेखरानुसारं विसर्गसन्धि-स्वादिसन्धिप्रकरणयोः पठितानां सूत्राणां, वार्त्तिकानां, पङ्क्तीनाम् (फक्किकानाम्) उदाहरणानाञ्च व्याख्या-ज्ञानम्। |
| 4. | CE- 4.1.1 | लघुसिद्धान्तकौमुदी (संज्ञाप्रकरणात् विसर्गसन्धिप्रकरणं यावत्) | • लघुसिद्धान्तकौमुद्याः संज्ञाप्रकरणस्थानां सूत्राणां वार्त्तिकानाञ्च ज्ञानम्।<br>• लघुसिद्धान्तकौमुद्याः अच्सन्धिप्रकरणस्थानां सूत्राणां, वार्त्तिकानां उदाहरणानाञ्च ज्ञानम्।<br>• लघुसिद्धान्तकौमुद्याः हल्सन्धिप्रकरणे पठितानां सूत्राणां, वार्त्तिकानां उदाहरणानाञ्च ज्ञानम्।<br>• लघुसिद्धान्तकौमुद्याः विसर्गसन्धिप्रकरणे पठितानां सूत्राणां, वार्त्तिकानां उदाहरणानाञ्च ज्ञानम्। |

| **Paper-2, 3, 4 & 5 Puranetihas** | | | **Semester-1** |
|---|---|---|---|
| **Sr. No** | **Code** | **Name of Subject** | **Outcome** |
| 1. | CC- 4.1.1 | महाभारते शान्तिपर्व राजधर्मानुशासनपर्व १ तः ५० अध्यायाः | • कर्णपरशुरामयोः प्रसङ्गेन गुरुशिष्यपरम्पराम्, धर्मप्रशंसाम्, ममताशक्तीनां त्यागम्, कर्णस्य बलपराक्रमं च छात्राः ज्ञास्यन्ति।<br>• राजदण्डस्य महत्त्वम्, यज्ञमहत्त्वम्, उत्तमधर्मस्योपदेशम्, राजधर्मं च ज्ञास्यन्ति।<br>• नृपोचितकार्याणां बोधम्, त्यागमहत्त्वम्, प्रारब्धस्य प्राबल्यम्, शोकनिवारणोपायान् च ज्ञास्यन्ति।<br>• कर्म, प्रायश्चित्तकर्म, पापकर्म, धर्मस्वरूपम्, भक्ष्याभक्ष्यविचारमित्येतेषां विषये छात्राः ज्ञास्यन्ति।<br>• श्राद्धकर्ममहत्त्वम्, अभ्यागतानां सत्कारम्, दानम्, कृतज्ञतामहत्त्वम्, भीष्मस्य गुणान् च छात्राः ज्ञास्यन्ति। |
| 2. | CC- 4.1.2 | श्रीमद्भागवतमहापुराणे पञ्चमस्कन्धः | • पद्यैः सह छात्रेषु गद्यानामपि अभ्यासो भविष्यति।<br>• जडभरतचरित्रेण मृगयोनिं पुनर्जन्मविचारं च ज्ञास्यन्ति। |

| | | | |
|---|---|---|---|
| | | | • आकाशे नवग्रहादीनां परस्पर-अन्तरकथनेन खगोलविद्याग्रहणं भविष्यति।<br>• नदीनाम्, पर्वतानां द्वीपानाञ्च अध्ययनेन भूगोलविद्याग्रहणं भविष्यति।<br>• विविधनरकाणां वर्णनेन सत्कर्मप्रवृत्तिः पुण्योपार्जनञ्च भविष्यतः। |
| 3. | CC- 4.1.3 | श्रीमद्भागवतमहापुराणे दशमस्कन्धः (पूर्वार्द्धः) | • भगवतः श्रीकृष्णस्य बाल्यलीलाधारितविविधकौशल्यग्रहणम्।<br>• भगवतः श्रीकृष्णस्य विविधाः बाल्यक्रीडाः, ताभिश्च सर्वाङ्गीणविकासः भविष्यति।<br>• गोवर्धनलीलया पराक्रमित्वं शूरत्वञ्च।<br>• भगवता श्रीकृष्णेन कृतेन वृक्षनदीनां रक्षणेन पर्यावरणसुरक्षाविचारः।<br>• गोकुलवृन्दावनव्रजमथुरादि-परिभ्रमणेन प्रवासपर्यटनस्य महत्त्वम्। |
| 4. | CE- 4.1.1 | पुराणविमर्शः १ तः १२ परिच्छेदाः | • पुराणस्य प्राचीनत्वम्, पुराणस्य परम्पराम्, अष्टादशपुराणानां नामानि, श्लोकसङ्ख्या तात्पर्यं च छात्राः ज्ञास्यन्ति।<br>• पुराणस्य पञ्च एवं दशलक्षणानां ज्ञानम्, अष्टादशपुराणानां परिचयं च छात्राः ज्ञास्यन्ति।<br>• भगवदवताराणां सङ्ख्याम्, प्रयोजनम्, वेदपुराणेषु तत्प्रामाण्यम्, पुराणोक्तविविधोपाख्यानानां च महत्त्वं ज्ञास्यन्ति।<br>• पुराणस्य प्रतिपाद्यविषयान्, प्रलयान्, धर्मशास्त्रीयविषयान्, पुराणेषु विज्ञानम्, खगोल-भूगोलवर्णनम्, प्राकृतिकं ज्ञानं च छात्राः प्राप्स्यन्ति।<br>• पुराणोक्तां वंशावलीम्, कलिधर्मान्, पञ्चायतनदेवान्, पुराणानां कालनिर्धारणम्, पुराणेषु टीकाः तथा च पुराणस्य भाषाशैलीं च छात्राः ज्ञास्यन्ति। |

| **Paper-2, 3, 4 & 5 Sarv-Darshana** | | | **Semester-1** |
|---|---|---|---|
| **Sr. No** | **Code** | **Name of Subject** | **Outcome** |
| 1. | CC- 4.1.1 | योगसूत्रम् व्यासभाष्यसहितम् | • व्यासभाष्यसहितस्य योगसूत्रस्य समाधिसाधनपादयोः परिचयः भवति। |

| | | | |
|---|---|---|---|
| | | (प्रथमद्वितीयपादौ) | • योगदर्शनानुसारं चित्तवृत्तयः, पञ्चक्लेशाः, चित्तवृत्तिनिरुद्धोपायाः, ईश्वरनिरूपणम् इत्यादिविषयाणां ज्ञानं भवति । <br>• योगदर्शनानुसारं प्रमाणानाम्, अष्टाङ्गयोगस्य च भाष्यसहितं ज्ञानं भवति । |
| 2. | CC- 4.1.2 | न्यायसिद्धान्तमुक्तावली (अनुमानप्रकरणात् द्रव्यनिरूपणान्ता) | • अनुमित्युत्पत्तिप्रक्रियायाः अङ्गानां यथा व्याप्तिज्ञानम्, परामर्शज्ञानम्, पक्षधर्मताज्ञानम्, हेत्वाभासाः इत्यादिविषयाणां ज्ञानं भवति । <br>• उपमितिप्रमायाः उत्पत्तिप्रक्रियायाः ज्ञानं सुस्पष्टं भवति । <br>• न्यायदर्शनानुसारं शाब्दबोधोत्पत्तिप्रक्रियायाः तदङ्गानां च ज्ञानं भवति । |
| 3. | CC- 4.1.3 | ब्रह्मसूत्रशाङ्करभाष्यम् (प्रथमाध्याये ईक्षत्यधिकरणं यावत्) | • ब्रह्मसूत्राणां भाष्यसहितं परिचयः भवति । <br>• वेदान्तदर्शनानुसारम् अध्यासस्य ज्ञानं भवति । <br>• वेदान्तदर्शनानुसारं ब्रह्मणः लक्षणम्, ब्रह्मणि शास्त्रप्रमाणम्, वेदान्तानाम् अद्वितीये ब्रह्मणि समन्वयः इत्यादिविषयाणां ज्ञानं भवति । <br>• वेदान्तदर्शनानुसारं चेतनकारणवादस्य अवबोधः भवति । |
| 4. | CE- 4.1.1 | पञ्चदशी (४ तः ६ प्रकरणानि) | • वेदान्तदर्शनानुसारं द्वैतज्ञानस्य मिथ्यात्वपूर्वकम् अद्वैतज्ञानं कथं भवति इति अवबोधः भवति । <br>• वेदान्ते निरूपितानां महावाक्यानां सङ्क्षेपेण ज्ञानं भवति । <br>• वेदान्तदर्शनानुसारं चिच्चातुर्विध्यम्, साक्षिनिरूपणम्, कूटस्थनिरूपणम्, जीवस्वरूपम् इत्यादिविषयाणां ज्ञानं भवति । |

| **Paper-2, 3, 4 & 5 Sahitya** | | | **Semester-1** |
|---|---|---|---|
| **Sr. No** | **Code** | **Name of Subject** | **Outcome** |
| 1. | CC- 4.1.1 | काव्यप्रकाशः | • साहित्यशास्त्रस्य विचारपरम्पराणां ज्ञानम् । |

| | | | |
|---|---|---|---|
| | | (१ तः ६ उल्लासाः) | • मम्मटस्य काव्यप्रकाशस्य परिचयः।<br>• काव्यस्वरूपज्ञानम्।<br>• शब्दशक्तिज्ञानम्।<br>• काव्यभेद-प्रभेदज्ञानम्। |
| 2. | CC- 4.1.2 | ध्वन्यालोकः (प्रथमोद्योतः) | • आनन्दवर्धनस्य तत्कृतीनाञ्च परिचयः।<br>• ध्वनिसिद्धान्ताः।<br>• ध्वनिविरोधिमतानि।<br>• ध्वनिलक्षणम्।<br>• प्रतीयमानार्थः। |
| 3. | CC- 4.1.3 अलङ्कारवर्गः | कुवलयानन्दः (प्रारम्भतः काव्यलिङ्गालङ्कारं यावत्) | • अलङ्कारस्वरूपं प्रकाराश्च।<br>• कुवलयानन्दस्य विषयवस्तुपरिचयः।<br>• तत्रत्यालङ्काराणां ज्ञानम्।<br>• लक्षणसङ्गतिसामर्थ्यम्।<br>• अलङ्काराणां विविधप्रकाराणां वैशिष्ट्यबोधः। |
| 4. | CC- 4.1.3 ध्वनिवर्गः | ध्वन्यालोकः (द्वितीयोद्योतः) | • ध्वनेः प्रकाराणां ज्ञानं भविष्यति।<br>• ध्वनिसन्दर्भे रसस्य स्थानं ज्ञास्यति।<br>• रसालङ्कारयोः भेदं ज्ञास्यति।<br>• गुणालङ्कारयोः भेदं ज्ञास्यति। |
| 5. | CC- 4.1.3 काव्यवर्गः | वासवदत्ता (पूर्वार्धः) | • गद्यकाव्यस्य परिचयः भविष्यति।<br>• गद्यकाराणां परिचयः भविष्यति।<br>• सुबन्धोः काव्यशैल्याः परिचयः भविष्यति।<br>• वासवदत्ताकाव्यस्य मङ्गलाचरणस्य श्लोकानां रसदर्शनं भविष्यति। |

| | | | |
|---|---|---|---|
| | | | • वासवदत्तागद्यकाव्यस्य पूर्वार्धस्य ज्ञानं भविष्यति। |
| 6. | CC- 4.1.3 नाट्यवर्गः | नाट्यशास्त्रम् (प्रथमद्वितीयाध्यायौ) | • भरतमुनेः नाट्यशास्त्रस्य च परिचयः।<br>• नाट्योत्पत्तिः।<br>• प्रेक्षागृहनिर्माणज्ञानम्, तद्भेदज्ञानं च।<br>• नाट्यप्रयोजनानि।<br>• नाट्यनिर्माणस्य कौशलं प्रारम्भिकं ज्ञानं च। |
| 7. | CE- 4.1.1 | उत्तररामचरितम् (१ तः ३ अङ्काः) | • भवभूतेः तत्कृतीनां च ज्ञानम्।<br>• नाटकलक्षणानां लक्ष्यप्रयोगज्ञानम्।<br>• भवभूतेः नाट्यकलाज्ञानम्।<br>• नाटकस्य रसानुभूतिः।<br>• रामचरित्रावबोधः। |

| **Paper-2, 3, 4 & 5 Vastu-Shastra** | | | **Semester-1** |
|---|---|---|---|
| **Sr. No** | **Code** | **Name of Subject** | **Outcome** |
| 1. | CC- 4.1.1 | मयमतम् | • अस्य प्रश्नपत्रस्य अध्ययनेन छात्रः नगरादिविन्यासस्य ज्ञानं प्राप्स्यन्ति।<br>• भूमेः शुभाशुभलक्षणानि ज्ञातुं शक्ष्यति।<br>• स्थपतिनिवासज्ञानं प्राप्स्यति। |

| | | | |
|---|---|---|---|
| 2. | CC-4.1.2 | समराङ्गणसूत्रधारः | • अस्य प्रश्नपत्रस्य अध्ययनेन छात्रः चतुःशालादीनां गृहाणां लक्षणं ज्ञास्यति।<br>• भूमिपरीक्षां ज्ञास्यति।<br>• गृहद्रव्यादिप्रमाणज्ञानं प्राप्स्यति। |
| 3. | CC-4.1.3 | बृहद्वास्तुमाला | • अस्य प्रश्नपत्रस्य अध्ययनेन छात्रः गृहनिर्माणार्थं दिक्साधनं ज्ञास्यति<br>• गृहे द्वारादिनिर्माणज्ञानं प्राप्स्यति।<br>• अस्वशालादिनिर्माणज्ञानं प्राप्स्यति। |

| **Paper-2, 3 & 4Paurohitya** | | | **Semester-1** |
|---|---|---|---|
| **Sr. No** | **Code** | **Name of Subject** | **Outcome** |
| 1. | CC-4.1.1 | कात्यायनश्रौतसूत्रम्(सकर्कभाष्यम्) | • परिभाषापूर्वकं फलयुक्तकर्मसहितं यज्ञविषये द्रव्य-देवता-त्यागतत्त्वानि जानीयु: ।<br>• दर्शपूर्णमासेष्टिसहितम् अग्न्यन्वाधानाध्वर्युयजमान-कृत्यानां बोधं प्राप्नुयात् ।<br>• गार्हपत्यादीनां विषये भाष्यकारमतसन्दर्भं प्राप्नुयात् । |
| 2. | CC-4.1.2 | अनुष्ठानप्रकाश: आदित: गणपतिमन्त्रपुरश्चरणं यावत् | • पुरश्चरणकर्तु:नियमा: गणेशमन्त्रपुरश्चरणविधि: ।<br>• प्रतिदिनजपसंख्या-जपनियमा: पुरश्चरणपूर्तयेहोमतर्पणमार्जनादिविधिं जानीयु: । |
| 3. | CC-4.1.3 | प्रायश्चित्तमयूख-आदित: परिवेदनं यावत् | • प्रायश्चित्तस्वरूपपूर्वकं चान्द्रायण-सोमानायन-सुरालक्षणसहितं पानशब्दार्थयुक्तं सुवर्णस्तेयाद्यकृत्यकरणे प्रायश्चित्तानि जानीयु: । |

| Paper-2, 3, 4 & 5Dharma-Shastra | | | Semester-1 |
|---|---|---|---|
| **Sr. No** | **Code** | **Name of Subject** | **Outcome** |
| 1. | CC-4.1.1 | निर्णयसिन्धु:परिच्छेद-1 | • वर्षवैविध्यपूर्वकं मलमास-भद्रातिथ्यादिनिर्णयसहितं रात्रिभोजननिषेधैकादशीव्रतनिर्णयबोध:।<br>• ग्रहणे दानादिकृत्यनिर्णयबोध:। |
| 2. | CC-4.1.2 | धर्मसिन्धु: परिच्छेद-2 | • संक्रान्ति-पुण्यकाल-सर्वव्रत-दशावतारजयन्तीषु कृत्यनिर्णयबोध:।<br>• वसन्त-अश्वत्थगङ्गा-पूजाविधानसंपादनम्। |
| 3. | CC-4.1.3 | धर्मसिन्धु: परिच्छेद-2 | • सोम-भौम-नागपञ्चमी-शाकदान-यजु:सामाथर्वोपाकर्म- विधिसंपादनम्।<br>• रक्षाबन्धन-जन्माष्टमी-कुलधर्म-संकटचतुर्थीव्रतनियम-पूर्वकं सर्वमासकृत्यादिबोधप्रापणम्। |
| 4. | CE- 4.1.1 | मनुस्मृति: 1-6 | • सृष्टि-कालयुगपरिमाण-विषयकबोध:।<br>• धर्मसंस्कारगृहस्थकर्तव्यपूर्वकं विवाहलक्षणसहितं पञ्चयज्ञसमन्वित-भक्ष्याभक्ष्यसर्वाश्रमनियमबोध:। |

| Paper-2, 3 & 4Swaminarayan Vedanta (S) | | | Semester-1 |
|---|---|---|---|
| **Sr. No** | **Code** | **Name of Subject** | **Outcome** |

| | | | |
|---|---|---|---|
| 1. | CC-4.1.1 | भद्रेशदासस्वामिविरचित - ब्रह्मसूत्रस्वामिनारायणभाष्यम् प्रथमोऽध्यायः | • श्रुतिस्मृतिप्रदर्शितसिद्धान्ताः सोहापोहं स्पष्टीभवन्ति दृढीभवन्ति च।<br>• नूतनदर्शनदृष्ट्या तर्कप्रस्थानस्य अस्य ग्रन्थस्य ज्ञानं प्राप्यते।<br>• अस्याध्ययनेन ब्रह्मणोर्जिज्ञासा भवति। तयोर्लक्षणं ज्ञायते। तत्प्रमाणमवगम्यते। |
| 2. | CC-4.1.2 | प्रमाणरत्नाकरः 1- 4 मञ्जूषाः | • स्वामिनारायणदर्शनाभ्यन्तरविषयाणां स्पष्टता भवति।<br>• प्रमाणमीमांसा, तत्त्वपञ्चकमीमांसा, अक्षरब्रह्मगुणातीतगुरुपरम्परा इत्यादिविषयाः सुस्पष्टाः भवन्ति। |
| 3. | CC-4.1.3 | भद्रेशदासस्वामिविरचित- छान्दोग्योपनिषद्भाष्यम् 6 – 8 अध्यायाः | • नूतनदर्शनदृष्ट्या वेदान्तग्रन्थानां ज्ञानं प्राप्यते।<br>• अभिनवभाष्यमतं ज्ञातुं प्रभवन्ति छात्राः।<br>• छान्दोग्योपनिषदि सन्निहितस्याक्षरपुरुषोत्तमदर्शनस्य ज्ञानं लभ्यते।<br>• छान्दोग्योपनिषदि प्रदर्शितानाम् उच्चविचाराणाम् अध्ययनेन शास्त्ररहस्यं हृदयस्थं कर्तुं शक्यते।<br>• सर्वं खल्विदं ब्रह्म, तत्त्वमसीत्यादिवाक्यानां मौलिकरीत्या अर्थः प्राप्यते।<br>• दहरादिविद्याभिः अक्षरब्रह्मपरब्रह्मस्वरूपं स्पष्टं भवति। |

| **Paper-2, 3 & 4Swaminarayan Vedanta (J)** | | | **Semester-1** |
|---|---|---|---|
| **Sr. No** | **Code** | **Name of Subject** | **Outcome** |
| 1. | CC-4.1.1 | ब्रह्मसूत्रभाष्यरत्नम् (प्रथमोऽध्यायः) | • परमपुरुषस्य परमात्मनः जगज्जन्मादिकारणत्वं स्पष्टतया ज्ञायते ।<br>• भगवतः शास्त्रयोनित्वम्, आनन्दमयत्वम्, आकाशप्राणादिशब्दवाच्यत्वं च अवबुध्यते । |

| | | | |
|---|---|---|---|
| | | | • परब्रह्मण: सर्वान्तर्यामित्वम्, भूमादिशब्दवाच्यत्वं च सरलतया ज्ञातुं शक्यते । |
| 2. | CC-4.1.2 | ऐतरेयतैत्तिरीयोपनिषदौ (गोपालानन्दस्वामिविरचितभाष्यसहिते) | • ऐतरेयोपनिषद: अध्ययनेन सृष्टिक्रम: सरलतया अवगन्तुं शक्यते ।<br>• तैत्तिरीयोपनिषद: शिक्षावल्लीत: शिक्षाया: माहात्म्यं यथार्थतया अवबुध्यते ।<br>• आनन्दवल्लीत: भृगुवल्लीतश्च परमपुरुषस्य परमात्मन: असाधारणं माहात्म्यम् अधिगम्यते । |
| 3. | CC-4.1.3 | श्रीमद्भगवद्गीता (गोपालानन्दस्वामिविरचितभाष्योपेता) (१ त: ६ अध्याया:) | • सांख्ययोगस्य यथावत् ज्ञानं भवितुमर्हति ।<br>• कर्मयोगस्य माहात्म्यं सरलतया अवगन्तुं शक्यते ।<br>• आत्मसंयमयोगस्य यथार्थस्वरूपम् अधिगम्यते । |

| **Paper-2, 3 & 4Ramanuja Vedanta** | | | **Semester-1** |
|---|---|---|---|
| **Sr. No** | **Code** | **Name of Subject** | **Outcome** |
| 1. | CC-4.1.1 | श्रीभाष्यम् (प्रथमाध्यायस्य द्वितीयपादतः चतुर्थपादपर्यन्तो भागः) | • सर्वेषु श्रुतिवाक्येषु सर्वकारणकारणत्वेन श्रीमन्नारायणस्यैव उपपादनम्।<br>• वेदान्तवेद्य ब्रह्मैव, तथापि कानिचिद् वेदान्तवाक्यानि प्रधानक्षेत्रज्ञान्तर्भूतवस्तुविशेषस्वरूपप्रतिपादनपराणि एव इति आशङ्क्य तन्निरसनमुखेन तत्तद्वाक्योदितकल्याणखुणाकरत्व ब्रह्मणः प्रतिपाद्यते। |
| 2. | CC-4.1.2 | श्रीमद्भगवद्गीता (13-15 अध्यायाः) रामानुजभाष्यसहिता | • देहात्मानोः स्वरूपम्, देहयाथात्म्यशोधनम्, देहवियुक्तात्मप्राप्त्युपायः, विविक्तात्मस्वरूपशोधनम्, तथाविधस्य आत्मनः च अचित्सम्बन्धहेतुः, अतः विवेकानुसन्धानप्रकारः ।<br>• गुणानां बन्धनहेतुताप्रकारः, गुणनिवर्तनप्रकारः च निरूपितः।<br>• भजनीयस्य भगवतः क्षराक्षरात्मकबद्धमुक्तविभूतियुक्तस्य विभूतिभूतात् क्षराक्षरपुरुषद्वयात् |

| | | | |
|---|---|---|---|
| | | | निखिलहेयप्रत्यनीककल्याणैकतानतया अत्यन्तोत्कर्षरूपेण विसजातीयस्य पुरुषोत्तमत्वं प्रतिपादितम् |
| 3. | CC-4.1.3 | छान्दोग्योपनिषद् (रङ्गरामानुजभाष्यसिहता) | • ॐकारोपासनस्य रसतमत्वकामाप्तिसमृद्धिगुणकत्वादिप्रकारवैशिष्ट्यम् ।<br>• उद्गीथविद्यायाः साङ्गं निरूपणम् ।<br>• सामोपासनस्य विस्तरेण स्वरूपोपादानम्।<br>• ॐकारस्य ब्रह्मोपासनविधिः । |

| Paper-2, 3 & 4Navya Nyaya | | | Semester-1 |
|---|---|---|---|
| **Sr. No** | **Code** | **Name of Subject** | **Outcome** |
| 1. | CC-4.1.1 | पक्षता (गादाधरीसमन्विता) | • अनुमितिंप्रतिपक्षतायाकारणत्वोपस्थापनम्।<br>• पक्षतालक्षणेदोषमुद्भाव्यसिद्धान्तपक्षतालक्षणस्यसमन्वयप्रदर्शनम्।<br>• प्राचीनप्रतिबध्यप्रतिबन्धकभावपुरस्सरंपक्षतायाःलक्षणविचारःक्रियते। |
| 2. | CC-4.1.2 | हेत्वाभाससामान्यनिरूक्तिः समन्विता) | • पञ्चहेत्वाभासानां सामान्यः परिचयः प्राप्यते ।<br>• हेत्वाभाससामान्यलक्षणस्य समन्वयादिकं ज्ञायते ।<br>• पञ्चहेत्वाभासेषु लक्षणस्य सार्थक्यविचाराः वर्णिताः । |
| 3. | CC-4.1.3 | न्यायभाष्यम्(प्रथमाध्यायाद्द्वितीयाध्यायेप्रमाणनिरूपणान्तम्) | • षोडशपदार्थानां तत्वज्ञानात् अपवर्गप्राप्तिः भवति ।<br>• द्वादशप्रमेयनिरूपणम्, हेत्वाभासानां ज्ञानम् , छलजात्यादिनां परिचयं प्राप्यते ।<br>• प्रत्यक्षस्य स्वरूपविचारः , अनुमितिक्रमविचारः । |

| Paper-1 Compulsory Sanskrit | | | Semester-2 |
|---|---|---|---|
| Sr. No | Code | Name of Subject | Outcome |
| 1. | CF-4.2.2 | संस्कृतसाहित्येतिहासः | • रूपकाणां परिचयः।<br>• प्रमुखनाट्यकाराणां परिचयः।<br>• गद्यकाव्यानां तत्कर्तॄणां च परिचयः।<br>• चम्पूकाव्यानां तत्कर्तॄणां च परिचयः।<br>• महाकाव्यानां तत्कर्तॄणां च परिचयः।<br>• साहित्यशास्त्रीयसिद्धान्तज्ञानम्। |

| Paper-2, 3, 4 & 5Veda | | | Semester-2 |
|---|---|---|---|
| Sr. No | Code | Name of Subject | Outcome |
| 1. | CC- 4.2.4 | शुक्लयजुर्वेदमाध्यन्दिन-संहिता (चयनयागस्यावशिष्टांशः) | • वेदविज्ञानमस्ति संसारस्याद्यं विज्ञानम्। वेदे च सर्वं विज्ञानं निहितमस्तीति क्रमेण शोधकार्यैः इदानीं सिद्धमपि भवति। तदुद्दिश्यैवैतत् प्रकरणं सभाष्यं वेदस्य पाठ्यक्रमे निर्धारितमस्ति। चिति-निर्माणम् अस्ति इष्टका-निर्माणतकनीकी (Bricks Manufacturing Technology) वैदिककालीना। अतः एवास्य निर्धारणमस्ति पाठ्यक्रमे। |
| 2. | CC- 4.2.5 | निरुक्तम् (अष्टमोऽध्ययः परिशिष्टभागश्च) | • अनेन पाठ्यांशेन आप्री-देवताविषये ज्ञानं भवति। अनेन निर्वचनशास्त्रेण निरुक्तेन मन्त्राणाम् आध्यात्मिकार्थज्ञानं भवति। पृथक् पृथक् देवतानां विषये विशेषं ज्ञानं भवति,येन ज्ञानेन वैदिकसमाजस्य आध्यात्मिकस्वरूपाध्ययनेन छात्रैः ज्ञातुं शक्यते। अर्थस्य प्रतीतिः शब्देन सह केन प्रकारेण जायते तस्य ज्ञानमपि निर्वचनपद्धत्याऽनेन ग्रन्थांशेन विधीयत इति फलम्। |
| 3. | CC- 4.2.6 | कात्यायनश्रौतसूत्रम् (द्वितीयोऽध्यायः), वैदिकप्रक्रिया | • **'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत'** इति श्रुतिवाक्यस्याधारेण श्रौतयागसम्पादनाय शास्त्रीयप्रक्रियायाः ज्ञानम् अनेन ग्रन्थेन भवतीति अस्य पाठ्यग्रन्थेषु निर्धारणम्। तथैव पाणिनीयलौकिकसंस्कृतव्याकरणाद् भिद्यते वैदिकं व्याकरणम्, तद् बोधाय छात्रेभ्यः सिद्धान्तकौमुद्याः वैदिकप्रक्रिया निर्धारिता अस्तीति लक्ष्यम्। |

| | | | |
|---|---|---|---|
| 4. | CE- 4.2.2 | वैदिकसूक्तसङ्ग्रहः | ● अनेन पाठ्यांशेन वैदिकदेवतानां विषये विशेषं ज्ञानं भवति। ऋग्वेदीय-सूक्तेषु अस्मिन् अंशे निर्धारितसूक्तानाम् अध्ययनेन देवतावादस्य वैज्ञानिकः पक्षः सूक्तानां च भौतिकविज्ञानदृष्ट्या अध्ययनं छात्रैः क्रियेत तदस्ति लक्ष्यम्। |

| **Paper-2, 3, 4 & 5 Falit Jyotish** | | | **Semester-2** |
|---|---|---|---|
| **Sr. No** | **Code** | **Name of Subject** | **Outcome** |
| 1. | CC- 4.2.4 | बृहत्संहिता (वातचक्राध्यायतः पिटकलक्षणाध्यायं यावत्) | ● अनेन पाठ्यक्रमेण छात्रैः प्राकृतिकापदानां परिचयः तेषाम् उपशमनस्य च ज्ञानं करिष्यते।<br>● पाठ्यक्रमेऽस्मिन् वातलक्षणं, वर्षाज्ञानं, भूकम्पलक्षणज्ञानं, धान्यादीनां वृद्धिह्रासज्ञानं, द्रव्यधात्वादीनां मूल्यस्य ह्रासवृद्धिज्ञानम् अङ्गविद्याज्ञानञ्च सङ्क्षेपेण करिष्यते। |
| 2. | CC- 4.2.5 | पञ्चस्वराः, नरपतिजयचर्यास्वरोदयः (गृहकूर्मचक्रप्रकरणं यावत्) | ● 'पञ्चस्वराः'इत्यनेन ग्रन्थेन छात्राः स्वरशास्त्रे पञ्चस्वराणां परिचयं, वर्षफलज्ञानम्, एकस्मिन् वर्षे सूर्यादिग्रहाणां दशाफलज्ञानं स्वरशास्त्रेण आयुर्निर्धारणञ्च कर्तुं शक्नुवन्ति।<br>● अनेन छात्राः अरिष्टज्ञानमपि करिष्यन्ति तथा च 'नरपतिजयचर्यास्वरोदयः'इति ग्रन्थेन स्वरशास्त्रस्य सिद्धान्तानां ज्ञानं सम्यक्तया करिष्यन्ति। |
| 3. | CC- 4.2.6 | जातकपारिजातः (अष्टकवर्गाध्यायतः आन्तम्) | ● अनेन पाठ्यक्रमेण छात्रैः आचार्यवैद्यनाथमते अष्टकवर्गसाधनं ज्ञास्यते। एवञ्च कन्यायाः शुभाशुभयोगस्य ज्ञानेन सह कालदशादिसाधनं तेषां फलज्ञानञ्च सम्यक्तया करिष्यते। |
| 4. | CE- 4.2.2 | मानसागरी (प्रारम्भतः पञ्चमहापुरुषभङ्गयोगं यावत्) | ● अनेन पाठ्यक्रमेण छात्रैः जन्मपत्रलेखनविधिः, युगसाधनं, संवत्सरसाधनं, जन्मकालिकतिथि-पक्ष-मास-वर्ष-नक्षत्रादीनां फलादेशः, लग्नादिद्वादशभावेशफलविचारः पञ्चमहापुरुषादियोगानां ज्ञानञ्च करिष्यते। |

| Paper-2, 3, 4 & 5 Navya Vyakaran | | | Semester-2 |
|---|---|---|---|
| **Sr. No** | **Code** | **Name of Subject** | **Outcome** |
| 1. | CC- 4.2.4 | परमलघुमञ्जूषा | • शक्तिनिरूपणे शक्तिविषयकनैयायिकमतखण्डनपुरःसरस्य मञ्जूषाकारमतस्य तथा च शक्तिविषयकाणाम् अन्योपयोगिनां विषयाणां ज्ञानम्।<br>• लक्षणानिरूपणे लक्षणाविषयकयोः नैयायिकमीमांसकमतयोः समुपस्थापनं तथा च लक्षणायाः खण्डनपुरःसरं शक्त्यैव निर्वाहज्ञानम्।<br>• व्यञ्जनास्फोटनिरूपणयोः तार्किकमतयोः खण्डनपुरःसरं मञ्जूषाकारमतयोः तथा चव्यञ्जनास्फोटविषयकाणाम् अन्योपयोगिनां विषयाणां ज्ञानम्।<br>• शाब्दबोधसहकारिकारणनिरूपणे शाब्दबोधे आवश्यकानाम् आकाङ्क्षा-योग्यता-आसत्ति-तात्पर्याणां सहकारिकारणानां ज्ञानम्। |
| 2. | CC- 4.2.5 | प्रौढमनोरमा (षड्लिङ्गप्रकरणानि) | • प्रौढमनोरमानुसारम् अजन्तपुंल्लिङ्गप्रकरणस्थानां सूत्राणां, वार्त्तिकानां, पङ्क्तीनाम् (फक्किकानाम्) उदाहरणानाञ्च व्याख्या-ज्ञानम्।<br>• प्रौढमनोरमानुसारम् अजन्तस्त्रीलिङ्ग-अजन्तनपुंसकलिङ्ग- प्रकरणयोः पठितानां सूत्राणां, वार्त्तिकानां, पङ्क्तीनाम् (फक्किकानाम्) उदाहरणानाञ्च व्याख्या-ज्ञानम्।<br>• प्रौढमनोरमानुसारं हलन्तपुंल्लिङ्ग-प्रकरणे पठितानां सूत्राणां, वार्त्तिकानां, पङ्क्तीनाम् (फक्किकानाम्) उदाहरणानाञ्च व्याख्या-ज्ञानम्।<br>• प्रौढमनोरमानुसारं हलन्तस्त्रीलिङ्ग-हलन्तनपुंसकप्रकरणयोः पठितानां सूत्राणां, वार्त्तिकानां, पङ्क्तीनाम् (फक्किकानाम्) उदाहरणानाञ्च व्याख्या-ज्ञानम्। |
| 3. | CC- 4.2.6 | लघुशब्देन्दुशेखरः (षड्लिङ्गप्रकरणानि) | • लघुशब्देन्दुशेखरानुसारम् अजन्तपुंल्लिङ्गप्रकरणस्थानां सूत्राणां, वार्त्तिकानां, पङ्क्तीनाम् (फक्किकानाम्) उदाहरणानाञ्च व्याख्या-ज्ञानम्। |

| | | | |
|---|---|---|---|
| | | | • लघुशब्देन्दुशेखरानुसारम् अजन्तस्त्रीलिङ्ग-अजन्तनपुंसकलिङ्ग-प्रकरणयोः पठितानां सूत्राणां, वार्त्तिकानां, पङ्क्तीनाम् (फक्किकानाम्) उदाहरणानाञ्च व्याख्या-ज्ञानम्।<br>• लघुशब्देन्दुशेखरानुसारं हलन्तपुंल्लिङ्ग-प्रकरणे पठितानां सूत्राणां, वार्त्तिकानां, पङ्क्तीनाम् (फक्किकानाम्) उदाहरणानाञ्च व्याख्या-ज्ञानम्।<br>• लघुशब्देन्दुशेखरानुसारं हलन्तस्त्रीलिङ्ग-हलन्तनपुंसकप्रकरणयोः पठितानां सूत्राणां, वार्त्तिकानां, पङ्क्तीनाम् (फक्किकानाम्) उदाहरणानाञ्च व्याख्या-ज्ञानम्। |
| 4. | CE- 4.2.2 | लघुसिद्धान्तकौमुदी ((षड्लिङ्गप्रकरणानि)) | • लघुसिद्धान्तकौमुद्याः अजन्तपुंल्लिङ्गप्रकरणस्य निर्धारितशब्दानां रूपसिद्धिज्ञानम्।<br>• लघुसिद्धान्तकौमुद्याः अजन्तस्त्रीलिङ्ग-अजन्तनपुंसकलिङ्ग-प्रकरणयोः निर्धारितशब्दानां रूपसिद्धिज्ञानम्।<br>• लघुसिद्धान्तकौमुद्याः हलन्तपुंल्लिङ्गप्रकरणस्य निर्धारितशब्दानां रूपसिद्धिज्ञानम्।<br>• लघुसिद्धान्तकौमुद्याः हलन्तस्त्रीलिङ्ग-हलन्तनपुंसकलिङ्ग-प्रकरणयोः निर्धारितशब्दानां रूपसिद्धिज्ञानम्। |

| **Paper-2, 3, 4 & 5 Puranetihas** | | | **Semester-2** |
|---|---|---|---|
| **Sr. No** | **Code** | **Name of Subject** | **Outcome** |
| 1. | CC- 4.2.4 | महाभारते शान्तिपर्व राजधर्मानुशासनपर्व ५१ तः १०० अध्यायाः | • भीष्मस्य धर्मोपदेशम्, भगवतः प्रातश्चर्याम्, परस्परवार्तालापकौशल्यम्, सत्यस्यावश्यकताम्, नीतिपूर्णं व्यवहारं च छात्राः ज्ञास्यन्ति।<br>• नीतिशास्त्रेण चरित्रनिर्माणम्, वर्णाश्रमधर्मान्, राजधर्मान्, राष्ट्ररक्षाम्, नृपस्य प्रधानकार्याणि च सदण्डनीतिं ज्ञास्यन्ति।<br>• इहामुष्मिकषट्त्रिंशद्गुणान्, सदाचारमहत्त्वम्, वैराग्यमहिमानम्, उत्तममध्यमाधममानवलक्षणानि, सभासदः लक्षणानि च छात्राः ज्ञास्यन्ति।<br>• सान्त्वना वचांसि, व्यावहारिकां नीतिम्, मन्त्रिदूतद्वारपालसेनापतीनां गुणान्, राष्ट्रवृद्ध्युपायान् च ज्ञास्यन्ति।<br>• धर्माचरणस्य महत्त्वम्, धर्मानुकूलं व्यवहारम्, युद्धनीतिम्, सैन्यसञ्चालनस्य रीतिं नीतिं च ज्ञास्यन्ति। |

| | | | |
|---|---|---|---|
| 2. | CC- 4.2.5 | श्रीमद्भागवतमहापुराणे एकादशस्कन्धः | • दत्तात्रेयस्य चतुर्विंशतिगुरूणां वर्णनेन गुणग्रहणात्मिका दृष्टिः ।<br>• विभूतियोगेन भगवतः सृष्टौ व्यापकत्वम् ।<br>• अष्टविधमूर्तीनां वर्णनेन भगवत्पूजायाः धार्मिकत्वम् ।<br>• कर्म-ज्ञान-भक्ति-साङ्ख्ययोगादीनाञ्च भिक्षुगीतया तितिक्षागुणविकासः ।<br>• भगवतः श्रीकृष्णस्य प्रभासतीर्थे आगमनेन तीर्थयात्रादीनां महत्त्वम् । |
| 3. | CC- 4.2.6 | श्रीमद्भागवतमहापुराणे दशमस्कन्धः (उत्तरार्द्धः) | • भगवतः श्रीकृष्णस्य विविधाः लीलाः, दम्पत्योः संवादकौशल्यम्, भगवतः पराक्रमं च ज्ञास्यन्ति ।<br>• भगवतः गृहचर्याम्, पौण्ड्रकादीनां वधे साहसं पराक्रमम्, यज्ञस्यावश्यकतां च ज्ञास्यन्ति ।<br>• तीर्थयात्रामहत्त्वम्, कृष्णसुदाम्नोः प्रसङ्गेन मैत्रीमाहात्म्यं च ज्ञास्यन्ति ।<br>• ब्रह्मज्ञानस्य महत्त्वम्, संवादनैपुण्यम्, तितिक्षाविषये च छात्राः ज्ञास्यन्ति ।<br>• सांसारिकमुत्तरदायित्वम्, उत्साहपूर्णं जीवनम्, सर्वासु अवस्थासु स्थैर्यं धैर्यं च छात्राः अवधारयिष्यन्ति । |
